# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College under University of Calcutta)

**B.A./B.SC. FIRST SEMESTER EXAMINATION, DECEMBER 2013**

**FIRST YEAR**

Date : 17/12/2013 **SANSKRIT (General)**

Time : 11.00 am – 2.00 pm Paper : I Full Marks : 75

1. Define and illustrate **any three** of the following : [3×3]
उपजातिः, रथोद्धता, वंशस्थविलम्, मालिनी, वसन्ततिलकम्।

2. Scan and name the metres in **any two** of the following : [2×3]
क) या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री।
ख) अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे।
ग) सरसिजमनुविद्धं शैवलेनापि रम्यम्।
घ) एवमाश्रमविरुद्धवृत्तिना।

3. a) Decline **any five** of the following : [5×1]
i) গুণিন্ in তৃতীয়া একবচন
ii) মুনি in চতুর্থী একবচন
iii) যুষ্মদ্ in সপ্তমী বহুবচন
iv) পিতৃ in দ্বিতীয়া বহুবচন
v) নদী in ষষ্ঠী দ্বিবচন
vi) মধু in প্রথমা দ্বিবচন
vii) অস্মদ্ in পঞ্চমী একবচন

b) Conjugate **any five** of the following : [5×1]
i) গম্ + লঙ্ 2nd person singular
ii) কৃ (পরস্মৈপদ) + বিধিলিঙ্ $1^{st}$ person singular
iii) হন্ + লট্ $3^{rd}$ person plural
iv) পঠ্ + লঙ্ $1^{st}$ person singular
v) পচ্ + লোট্ $2^{nd}$ person singular
vi) দা + লট্ $3^{rd}$ person plural
vii) বদ্ + লৃট্ $2^{nd}$ person dual

4. Answer **any one** of the following : [10]
a) শুকনাস কে ছিলেন? পাঠ্যাংশ অবলম্বনে তাঁর উপদেশের সার্থকতা বিচার করো।
b) বাণের রচনারীতি এবং কাব্যিক গুণাবলীর পর্যালোচনা করো।

Or,

Translate into Bengali **any two** of the following : [2×5]
a) अपरे तु स्वार्थनिष्पादनपरैर्धनपिशितग्रासगृध्रैरास्थाननलिनीबकैर्द्यूतं विनोद इति, परदाराभिगमनं वैदग्ध्यमिति, मृगया श्रम इति, पानं विलास इति, प्रमत्तता शौर्य्यमिति, स्वदारपरित्यागोऽव्यसनितेति, गुरुवचनावधीरणमपरप्रणेयत्वमिति, अजितभृत्यता सुखोपसेव्यत्वमिति, नृत्यगीतवाद्यवेश्याभिसक्तिः रसिकतेति, महापराधानाकर्णनं महानुभवता।
b) मनसा देवताध्यारोपणप्रतारणादसद्भूतसम्भावनोपहताश्च अन्तःप्रविष्टापरभुजद्वयमिवात्मवाहुयुगलं सम्भावयन्ति। त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कन्ते। दर्शनप्रदानमपि अनुग्रहं गणयन्ति, दृष्टिपातमप्युपकारपक्षे स्थापयन्ति, सम्भाषणमपि संविभागमध्ये कुर्वन्ति, आज्ञामपि वरप्रदानं मन्यन्ते, स्पर्शमपि पावनमाकलयन्ति।
c) आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय। कुप्यन्ति हितवादिने। सर्वथा तमभिनन्दन्ति, तमालपन्ति, तं पार्श्वे कुर्वन्ति, तं संवर्धयन्ति, तेन सह सुखमवतिष्ठन्ते, तस्मै ददति, तं मित्रतामुपनयन्ति, तस्य वचनं शृण्वन्ति, तत्र वर्षन्ति, तं बहुमन्यन्ते, तमाप्ततामापादयन्ति, योऽहर्निशमनवरतमुपरचिताञ्जलिरधिदैवतमिव विगतान्यकर्तव्यः स्तौति, यो वा माहात्म्यमुद्भावयति।

5. Translate into Sanskrit (**any one**) : [1×10]
a) ভারতভূমি আমাদের দেশ। উত্তর সীমানায় আছে পর্বতরাজ হিমালয়। সে পৃথিবীর মানদণ্ড - এমনই ছিল কালিদাসের রমণীয় কল্পনা। এর মধ্যভাগে বিরাজ করছে বিন্ধ্যপর্বত এবং পশ্চিমে আরব সাগর। দক্ষিণে ভারতমহাসাগর নিয়ত তার চরণদ্বয় প্রক্ষালন করে। হিমালয় থেকে প্রবাহিত গঙ্গা ভারতমাতার কণ্ঠে রত্নমালার ন্যায় বিরাজ করে। সুজলা, সুফলা, শস্যশ্যামলা ভারতভূমি। এর গৌরবময় ঐতিহ্য বিশ্বের বিস্ময় উৎপাদন করে।

b) সংস্কৃত ভারতীয় সংস্কৃতির মূল। তা আমাদের ঐক্যবদ্ধতার কারণস্বরূপ। ভারতবর্ষের যা ঐতিহ্য, তা সংস্কৃতের অধীন। সংস্কৃত আঞ্চলিক ভাষাগুলিরও প্রাণস্বরূপ। সংস্কৃতের অমৃতরসে সেই ভাষাগুলির সমৃদ্ধি সম্ভব। আসমুদ্রহিমাচল এক এবং উদাত্ত মন্ত্র তীর্থে তীর্থে গীত হয়। সংস্কৃত ব্যতীত ভারতীয়দের অন্য কোনো গৌরব নেই। বিশ্বসাহিত্য ভাণ্ডারে সংস্কৃতের সুধাভাণ্ড অমৃতস্বাদ বিতরণ করে।

6. Answer **any five** questions after reading the following unseen passage : [5×2]

अस्ति मन्दरपर्वते दुर्दान्तो नाम सिंहः। एकदा पशवः सर्वे मिलित्वा तस्य समीपं गत्वा उक्तवन्तश्च — 'किमिति भवान् यथेच्छं पशुं हन्ति। वयमेव तवाहारार्थं प्रत्यहम् एकैकं पशुम् उपहरामः।' सिंहेनोक्तम् — 'तथैव भवतु'। एकदा शशकस्य वारः समायातः। 'अवश्यं मरिष्यामि चेत्, किं सिंहस्य अनुनयेन?' इति चिन्तयित्वा स मन्दं चलितः। क्षुधार्तः सिंहः तमवदत्– 'विलम्बादागच्छसि कथम्?' शशक उवाच — 'पथि अपरः सिंहः मां बलाद् धृतवान्। तस्य समीपे पुनरागमनाय शपथं कृत्वा अत्रागतः।' सिंहेनोक्तम् — 'सत्वरं दर्शय क्व स दुष्टः तिष्ठति।' सिंहेन सह शशकः कूपस्य समीपे आगत्य कूपजले सिंहस्य प्रतिबिम्बं दर्शयामास। अथ गर्जन् सिंहः आत्मानं निक्षिप्य मरणं प्राप्तः।

क) सिंहस्य नाम किम्? सः कुत्र तिष्ठति?

ख) सिंहं पशवः किमवदन्?

ग) शशकस्य विलम्बगमने को हेतुः?

घ) सिंहस्य जिज्ञासायां शशकस्य उत्तरं कीदृशमासीत्?

ङ) शशकः सिंहाय किमदर्शयत्?

च) कथं सिंहो मृतः?

छ) गद्यांशस्य का नीतिकथा भवितुम् अर्हति?

7. Join in Sandhi **any three** of the following : [3×1]

मातुः + रोदनम्; महान् + लाभः; कवी + इमौ; तौ + एव; तान् + तान्; साधु + अत्र।

8. Disjoin the sandhis in **any three** of the following : [3×1]

शयनम्, वागीशः, उत्थानम्, बृहस्पतिः, संस्कारः।

9. Account for the case-endings in **any two** of the following : [2×2]

क) <u>कवीनां</u> कालिदासः श्रेष्ठः।

ख) <u>दुःखात्</u> रोदिति बाला।

ग) <u>जटाभिः</u> तापसमपश्यम्।

ङ) <u>सूर्ये</u> उदिते पद्मं प्रकाशते।

च) साधुः <u>वनमु</u>पवसति।

10. Frame sentences to illustrate **any two** of the following : [2×2]

क) अनादरे षष्ठी

ख) व्याप्त्यर्थे द्वितीया

ग) हेतौ तृतीया

घ) तादर्थ्ये चतुर्थी

11. Correct **any three** of the following sentences : [3×1]

क) भगवानस्य अपारा महिमा।

ख) सरस्वतीं नमो नित्यम्।

ग) सानन्देन नृत्यन्ति बाला।

घ) भवान् यथाविधिं धर्मं चर।

ङ) न मे अर्थस्य प्रयोजनम्।

12. Substitute single words for **any three** : [3×1]

क) कुटिलं गच्छति

ख) मनोरपत्यं पुमान्

ग) महत् अरण्यम्

घ) हिरण्यस्य विकारः

ङ) पुनः पुनः ज्वलति